अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

| Paper Code |
| --- |
| BV-103 |

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – दिसम्बरमासः – 2018
## शास्त्री/बी. ए. व्याकरणम् (सत्रम् : प्रथमम्)
## तृतीयपत्रम्-संस्कृतसाहित्यम्

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**अवधेयम् :** इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। अत्र खण्डद्वयं वर्त्तते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

### (खण्डः – क) 20 अङ्काः
### (कौटलीयार्थशास्त्रम्)
### (व्यसनाधिकरणम्)

**प्रश्नः1– कस्यचिदेकस्योत्तरं लिखन्तु।** **(1X5=05)**

(क) गद्यसाहित्यस्योत्पत्तिविषये सप्रमाणं विवेचनं कुर्वन्तु।

***अथवा***

कौटलीयार्थशास्त्रविषये लघुनिबन्धो लेखनीयः।

(ख) वाक्यार्थान्वयर्थादिनिर्देशपूर्वकं कस्यचिदेकस्य श्लोकस्य व्याख्या कार्या – **(1X5=05)**

(i) असतां प्रग्रहः कामः कोपश्चावग्रहः सताम्। व्यसनं दोषबाहुल्यादत्यन्तमुभयं मतम्।।

(ii) शेषप्रकृतिनाशस्तु यत्रैकव्यसनाद् भवेत्। व्यसनं तद्गरीयः स्यात्प्रधानस्येतरस्य वा।।

(ग) केषाञ्चन पञ्चानां लघूत्तराणि लेखनीयानि। **(2X5=10)**

(i) किन्नाम व्यसनम्? सूत्रसहितं लिखन्तु।

(ii) किन्नामार्थदूषणम्? कतिविधं भवति इत्यपि बोधयन्तु।

(iii) के कामजदोषाः? लिखन्तु।

(iv) के कोपजदोषाः? विवेचयन्तु।

(v) के द्यूतदोषाः? बोधयन्तु।

(vi) पानसंपदं लिखन्तु।

(vii) अर्थदूषणदण्डपारूष्ययोः कतरद् गरीयः कौटल्यमतानुसारेण?

### (खण्डः – ख) 25 अङ्काः
### (दूतवाक्यम्)

**प्रश्नः2–** **(1X5=05)**

(क) नाटकोद्भवं संक्षेपेण विवेचयन्तु।

(ख) **(2X5=10)**

(i) दूतवाक्यस्य कथावस्तु संक्षेपेण लिखन्तु।

(ii) महाकविभासस्य जीवनपरिचयं संक्षेपेण विवृण्वन्तु।

(ग) द्वौ श्लोकौ छन्दोऽलंकारसहितौ व्याख्यायताम (2X5=10)

(i) उद्धूतरोषमिव में हृदयं सहर्षं।
प्राप्तं रणोत्सवमिमं सहसा विचिन्त्य।
इच्छामि पाण्डवबले वरवारणानाम्।
उत्कृत्तदन्तमुसलानि मुखानि कर्तुम्।।

(ii) नीचोऽहमेव विपरीतमतिः कथं वा,
रोषं परित्यजतमद्य नयानयज्ञौ,
द्यूताधिकारमवमानममृष्यमाणाः
सत्वाधिकेषु वचनीयपराक्रमाः स्युः।।

(iii) कृष्णापराभवभुवा रिपुवाहिनीभ -
कुम्भस्थलीदलनतीक्ष्णगदाधरस्य
भीमस्य कोपशिखिना युधि पार्थपत्रि -
चण्डानिलैश्च कुरुवंशवनं विनष्टम्।।

## (खण्डः – ग) 25 अङ्काः
## (काव्यदीपिका)

**प्रश्नः3– केचन पञ्चप्रश्नाः समाधेयाः।** (5X5=25)

(क) काव्यशास्त्रोद्भवं मुख्यकाव्यशास्त्रवर्णनपुरस्सरं लिखन्तु।

(ख) काव्यस्य किं स्वरूपं, सप्रयोजनं वर्ण्यताम्।

(ग) के च स्मृतिहेतवः? सोदाहरणं लिखत।

(घ) शब्दः कतिविधः? अभिधावाचकयोरर्थं सोदाहरणं प्रकटयन्तु।

(ङ) लक्षणायाःस्वरूपं सश्लोकं लिखन्तु। कतिविधा लक्षणा भवतीदमपि ज्ञापयन्तु।

(च) जहदजहत्स्वार्थलक्षणयाः स्वरूपं सोदाहरणं लिखन्तु।

(छ) व्यञ्जनायाः किं स्वरूपम्? कतिविधा व्यञ्जना, संक्षेपेण विवेचयन्तु।

--------------x--------------